संस्कृत.

याज्ञिक

क्र. नं. २८

पौराणिक.

"Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

आराधनप्रयोग.

३७३१

(1) श्रीगणेशायनमः॥आराधनप्रयोगः॥देशकालौसंकीर्त्यश्रीनारायणप्रीत्यर्थंब्रह्मी
भूतस्यगुरोराधनंकरिष्ये।गुरुचतुष्टयस्यकेशवादिसंकर्षणादिवा एकैकं इत्येवंषो
डशब्राह्मणानामभिप्रायोऽन्यते।ब्रह्मीभूतस्यगुरोःसमाराधनेगुर्वर्थेभवद्भिःक्षणःकर्त्तव्यः॥
एवंपरमगुर्वर्थे॰परमेष्ठीगुर्व॰परात्परगु॰शुक्लपक्षेकेशवादिद्वादशनामभिः।कृष्णपक्षे
संकर्षणादिद्वादशनामभि॰गंधाक्षततुलसीकर्पूरमिश्रजलेनवरणक्रमेणतेषांपा
दप्रक्षालनंकृत्वा।तानाचम्यस्वयं॰पादप्रक्षालनोदकंपात्रांतरेगृहीत्वागंधपुष्पतुल
सीदलैरभ्यर्च्य।आनंदमानंदकरंप्रसन्नंज्ञानस्वरूपंनिजबोधयुक्तं।योगींद्रमीड्यंभवरो
गवैद्यंश्रीमद्गुरुंनित्यमहंनमामि।इतिनमस्कुर्यात्।तत्पादोदकपात्रमलंकृत्यदेवसं
न्निधौस्थापयेत्।कृतासनेषुप्राङ्मुखा।उदङ्मुखान्वाउपवेश्यपुरुषसूक्तेनप्रत्यृचं ॐ
नमोनारायणायेतिमंत्रसहितेन आवाहनादिषोडशोपचारैःपदार्थानुसमयेनाभ्यर्च
येत्।ततःसर्वेषुपात्रेषुपायसादिविशिष्टद्रव्यंसाज्यंव्यंजनसहितंपरिविष्यगायत्र्या
प्रोक्ष्यगुरवेइदमन्नंपरिविष्टंपरिवेष्यमाणंचातृप्तेःस्वाहाहव्यंनममएवंसर्वत्रान्नत्याग॰

(2)
आराधना

ॐ तद्ब्रह्मेत्यनुवाकं जपेत्। ब्रह्मार्पणं ब्र० एको विष्णुर्म० व्यय: अनेन मम पितु: ब्रह्मीभूत
स्य गुरोराराधनेन ब्राह्मणभोजनेन श्रीनारायण: प्रीयतां। आपोशानं दत्वा। उपनिषन्मंत्रा
न् श्रावयेत्। तृप्तेषु ॐ तद्ब्रह्मेत्यनुवाकं जपित्वा। उत्तरापोशानं दत्वा। आचांतेषु तांबूलदक्षि
१ णावस्त्रादि यथाविभवं दत्वा॥ गुरोराराधनांगं तीर्थपूजनं करिष्ये॥ चतुरस्रं मंडलं गोम
येनोपलिप्य तत्र रंगवल्ल्यादि० तन्मंडले धान्योपरि पादोदककलशं संस्थाप्य। तत्र गंगा
दितीर्थानि भावयित्वा पुरुषसूक्तेन षोडशोपचारैः संपूज्य। तीर्थराजाय नम इति तत्पा
त्रं शिरसि धृत्वा। श्लोक: सरस्वत्यां० भीषास्माद्वात: पवते इत्यनुवाकं जपित्वा हरि
कीर्तनपुर:सरं हर्षनृत्यं कृत्वा। तस्मात् पुनर्मंडले संस्थाप्य पंचोपचारपूजनं कृत्वा
विप्रान् प्रदक्षिणीकृत्य। आनंदमानंद। ना। इति श्लोकं पठित्वा। गुरुर्ब्रह्मा० इत्यादिमंत्रैर्द्वि
जांस्तीर्थराजं नमस्कृत्य गुर्वर्थे विप्रहस्ते पादोदकपात्रं दत्वा तदाज्ञया तीर्थमंत्रेण ग
ह्णीयात्। तत्र मंत्रा:। अविद्यामूलनाशनं सर्वपापप्रणाशनं। गुरो: पादोदकं चित्रं संसा २
रद्रुमनाशनं। तान् पुन: प्रणम्य तानन्यांश्च दक्षिणाभिस्तोषयित्वा। कर्मेश्वरार्पणं कुर्या
त्। सुहृद्युक्तो भुंजीत॥ ॥इदं पुस्तकं गोरपले इत्युपनाम सदाशिवेन लिखितं॥ शके १७५७

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com